# 2017

## SANSKRIT

### ( Major )

Paper : 3.1

*Full Marks* : 80

*Time* : 3 hours

*The figures in the margin indicate full marks for the questions*

1. Answer the following questions : 1×5=5

   (a) How many काण्डs are there in the *Rāmāyaṇa*?

   (b) In which dynasty Rāmacandra was born?

   (c) ''श्रुत्वा चैतत् त्रिलोकज्ञो''

   Who is 'त्रिलोकज्ञ' referred to here?

   (d) What is the meaning of the term 'शूर्पणखा'?

   (e) Who is Guha?

2. Explain any *two* of the following : 5×2=10

(a) बहवो दुर्लभाश्चैव ये त्वया कीर्तिता गुणाः।
मुने वक्ष्याम्यहं बुद्ध्वा तैर्युक्तः श्रूयतां नरः॥

(b) सर्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः।
आर्यः सर्वसमश्चैव सदैव प्रियदर्शनः॥

(c) रामस्तु पुनरालक्ष्य नागरस्य जनस्य च।
तत्रागमनमेकाग्रो दण्डकान् प्रविवेश ह॥

3. Answer any *two* of the following : 10×2=20

(a) Write a note on the elements of poetic beauty of Chapter I of the Bālakāṇḍa of the *Rāmāyaṇa*.

(b) ''एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे।
महर्षे त्वं समर्थोऽसि ज्ञातुमेवम्विधं नरम्॥''

Who is the speaker here? Who is addressed as 'महर्षे'? Summarise the speech hinted herein.

(c) Elucidate the idea contained in the following :

(i) समुद्र इव गाम्भीर्ये धैर्येण हिमवानिव।

(ii) पूर्वं दत्तवरादेवी वरमेनमयाचत।





4. Explain any *two* of the following : 5×2=10

(a) हुतेन शाम्यते पापं स्वाध्यायैः शान्तिरुत्तमा।
दानेन भोगानित्याहुस्तपसा स्वर्गमाप्नुयात्॥

(b) स्वधर्माचरणे युक्ता ये भवन्ति मनीषिणः।
तेषां स्वर्गफलावाप्तिर्योऽन्यथा स विमुह्यते॥

(c) वात्सल्यात्सर्वभूतेभ्यो वाच्याः श्रोत्रसुखा गिरः।
परितापोपघातश्च पारुष्यं चात्र गर्हितम्॥

5. Answer any *two* of the following : 10×2=20

(a) Write a summary of Chapter 191 of the Śāntiparvan of the *Mahābhārata*.

(b) Discuss the duties of a person in the Brahmacarya and Gārhasthya stage as you find in the Śāntiparvan (Chapter 191) of the *Mahābhārata*.

(c) Write short notes on 'धर्म' and 'त्रिवर्ग'.

6. Read the following passage and answer the questions in Sanskrit :

कस्मिंश्चिदधिस्थाने चत्वारो ब्राह्मणपुत्राः परस्परं मित्रतां गता वसन्ति स्म। ते चापि दारिद्र्योपहताः परस्परं मन्त्रं चक्रुः —''अहो, धिगियं दरिद्रता। तद् गच्छामः कुत्रचिदर्थाय।'' इति सम्मन्त्र्य स्वदेशं पुरं च

स्वसुहृत्सहितं गृहं च परित्यज्य प्रस्थिताः। एवं क्रमेण गच्छन्तोऽवन्तीं प्राप्ताः, तत्र सिप्राजले कृतस्नानाः महाकालं प्रणम्य यावन्निर्गच्छन्ति, तावद् भैरवानन्दो नाम योगी सम्मुखो बभूव। ततस्तं ब्राह्मणोचितविधिना सम्भाव्य तेनैव सह मठं जग्मुः। अथ तेन पृष्टाः — कुतो भवन्तः समायाताः? क्व यास्यथ? किं प्रयोजनम्?'' ततस्तैरभिहितम्—''वयं सिद्धियात्रिकाः, तत्र यास्यामो यत्र धनाप्तिर्मृत्युर्वा भविष्यतीत्येष निश्चयः। तत्कथ्यतामस्माकं कश्चिद् धनोपायो इति। अद्भुतशक्तिर्भवान् श्रूयते। वयमप्यतिसाहसिकाः। उक्तञ्च—

''महान्त एव महतामर्थं साधयितुं क्षमाः।
ऋते समुद्रादन्यः को बिभर्ति बडवानलम्॥''

भैरवानन्दोऽपि तेषां सिद्ध्यर्थं बहूपायं सिद्धवर्तिकाचतुष्टयं कृत्वार्पयत्। आह च—''गम्यतां हिमालयदिशि। तत्र संप्राप्तानां यत्रवर्तिः पतिष्यति तत्र निधानमसन्दिग्धं प्राप्स्यथ। तत्र स्थानं खनित्वा निधिं गृहीत्वा व्याघुट्यताम्।''

(a) किं कर्त्तुं ब्राह्मणपुत्राः स्थिरीकृतवन्तः? 2

(b) कुत्र वा ते समुपस्थिताः? 1

(c) कुत्र नु ब्राह्मणपुत्राः स्नानं कृतवन्तः? 1

(d) कं देवं ब्राह्मणपुत्राः पूजयन्ति स्म? 1

(e) योगिनः नाम किमासीत्? 1

(f) योगी ब्राह्मणपुत्रान् किं ददाति स्म? 1



( Continued )



(g) किमर्थं नु ब्राह्मणपुत्राः परस्परं मन्त्रं कृतवन्तः? 2

(h) परित्यज्य, जग्मुः, श्रूयते, गृहीत्वा—इति पदचतुष्टयस्य व्युत्पत्तिः प्रदेया। 2

(i) गच्छन्तोऽवन्तीम्, यावन्निर्गच्छन्ति—इति पदद्वयस्य सन्धिविच्छेदः करणीयः। 2

(j) कृतस्नानाः इति पदे समासो कोऽस्ति? अपि च तस्य व्यासवाक्यं लिख्यताम्। 2

★★★